# Mangal chandika stotram

मंगल चंडिका स्तोत्रम्

श्री मंगलचंडिकास्तोत्रम्

ॐ ह्रीं श्रीं क्लीं सर्वपूज्ये देवी मङ्गलचण्डिके ,
ऐं क्रूं फट् स्वाहेत्येवं चाप्येकविन्शाक्षरो मनुः ‼
पूज्यः कल्पतरुश्चौव भक्तानां सर्वकामदः ,
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ‼
मन्त्रसिद्धिर्भवेद् यस्य स विष्णुः सर्वकामदः ,
ध्यानं च श्रूयतां ब्रह्मन् वेदोक्तं सर्व सम्मतम् ‼
देवीं षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम् ,
सर्वरूपगुणाढ्यां च कोमलाङ्गीं मनोहराम् ‼
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ,
वन्हिशुद्धांशुकाधानां रत्नभूषणभूषिताम् !
बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम् ,
बिम्बोष्टिं सुदतीं शुद्धां शरत्पद्मनिभाननाम् !
ईषद्धास्यप्रसन्नास्यां सुनीलोल्पललोचनाम् ,
जगद्धात्रीं च दात्रीं च सर्वेभ्यः सर्वसंपदाम् !
संसारसागरे घोरे पोतरुपां वरां भजे !
देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ,
प्रयतः संकटग्रस्तो येन तुष्टाव शंकरः !
शंकर उवाच रक्ष रक्ष जगन्मातर्देवि
मङ्गलचण्डिके ,
हारिके विपदां राशेर्हर्षमङ्गलकारिके !
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके ,
शुभे मङ्गलदक्षे च शुभमङ्गलचण्डिके !
मङ्गले मङ्गलार्हे च सर्व मङ्गलमङ्गले ,
सतां मन्गलदे देवि सर्वेषां मन्गलालये !

पूज्या मङ्गलवारे च मङ्गलाभीष्टदैवते ,
पूज्ये मङ्गलभूपस्य मनुवंशस्य संततम् !
मङ्गलाधिष्टातृदेवि मङ्गलानां च मङ्गले ,
संसार मङ्गलाधारे मोक्षमङ्गलदायिनि !
सारे च मङ्गलाधारे पारे च सर्वकर्मणाम् ,
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे !
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम् ,
प्रतिमङ्गलवारे च पूजां कृत्वा गतः शिवः !
देव्याश्च मङ्गलस्तोत्रं यः श्रुणोति समाहितः ,
तन्मङ्गलं भवेच्छश्वन्न भवेत् तदमङ्गलम् !
! इति श्री ब्रह्मवैवर्ते मङ्गलचण्डिका स्तोत्रं संपूर्णम् !

संपूर्णम्॥

InstaAstro